# वृद्धायाः चार्तुयम्

आसीत् चित्रपुरम् नाम किमपि नगरं श्रीपर्वतस्य समीपे। ”पर्वतस्य शिखरप्रदेशे घण्टाकर्णः नाम राक्षसः प्रतिवसती” ति जनप्रवादः अवर्तत्।

अथैकदा कश्चन चोरः घण्टामेकां चोरयित्वा वनं गतः, व्याघ्रेण च हतः। तदा सा घण्टा वने एव अपतत्। अन्यस्मिन् दिने केचन वानराः तत्र आगछन्। कुतुहलेन तां घण्टां हस्ते धृत्वा अधुन्वन्। अकस्मादेव घण्टानादः अजायत्। घण्टानादेन चकिताः ते पुनः पुनः घण्टामधुन्वन्, घण्टाणादं च अकुर्वन्।

चित्रपुरस्थाः नागरिकाः वारं वारं पर्वतशिखरप्रदेशात् घण्टानादमाकर्णयन्। भयाकुलाः ते अचिन्तयन् ”नुनं शिखरप्रदेशे घण्टकर्णः नाम राक्षसः वर्तते, यः मनुष्यां खादति, घण्टां च वादयति”। एवं च भीत्या पौरजनाः अन्यत्र गन्तुं प्रारभन्त।

तदा चिन्ताकुलः नृपः उदघोषयत् ”यः घण्टकर्णं नाशयेत्, तस्मै विपुलं सुवर्णं यच्छेयम् अहम्” इति। तत् श्रृत्वा काचन वृद्धा वनं गता। तत्र च कंचित् कालं निभृतम् अतिष्ठत्। ’वानराः एव घण्टां वादयन्ति’ इति सा अपश्यत्।

अन्येद्युः सा वानरेभ्यः मधुराणि फलाणि अयच्छत्। यावत् ते फलभक्षणमग्नाः संजाताः, तावदेव तां घण्टामादाय प्रमुदिता सा नृपं प्रत्यागच्छत्, अवदच्च ”राजन्, घण्टाकर्णः हतः मया” इति। भुपः तस्यै प्रभूतं सुवर्णमयच्छत्। ततः प्रभृति पौरजनाः घण्टारवं न आकर्णयन्। भयमुक्ताः ते नगरं प्रतिन्यवर्तन्त्।